# Sanskrit

## Code No. 209

### भूमिका

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। अस्यां भाषायां ज्ञानविज्ञानयोः अनेके ग्रंथाः लिखिताः; ये आधुनिकस्य विज्ञानस्यापि अध्ययने सहायकाः सन्ति। न केवलं भारतस्य सर्वासु भाषासु अस्याः प्रभावः स्पष्टतया दृश्यते अपितु 'अवेस्ता' आदि वैदेशिकभाषास्वपि वर्तते। अतएव इमां भाषां ज्ञात्वा वयं अन्याः भाषाः अपि सारल्येन ज्ञातुं शक्नुमः। नवशब्दनिर्माणे अस्याः भाषायाः सामर्थ्यमनुपमम् वर्तते।

### औचित्यम्

संस्कृतभाषायाः अध्ययनेन वयं भारतस्य प्राचीनतमां संस्कृतिम् अपि ज्ञातुं शक्नुमः। एषः पाठ्यक्रमः सम्प्रेषण-आधरितोऽस्ति। एषः माध्यमिक-स्तरीयछात्राणां मार्गदर्शनार्थं निर्मितोऽस्ति। अनेन छात्राः संस्कृतभाषायां निहितनैतिकमूल्यैः अपि परिचिताः भविष्यन्ति स्वजीवने च तानि धरयितुं समर्थाः भविष्यन्ति। राष्ट्रनिर्माणेऽपि ते अधिकाधिकं सहायकाः भविष्यन्ति।

### उद्देश्यम्

अस्मिन् स्तरे संस्कृतभाषायाः शिक्षणस्य निम्नलिखितानि उद्देश्यानि सन्ति-

### सामान्य-उद्देश्यानि

माध्यमिकस्तरे संस्कृतपठनस्य पाठनस्य च अधोलिखितानि उद्देश्यानि सन्ति :-

- संस्कृतभाषायाः सामान्यज्ञानवर्धनं भविष्यति येन संस्कृतस्य सरलान् अंशान् पठित्वा छात्राः तेषाम् अंशानाम् अर्थान् ज्ञास्यन्ति। ते स्वतः मौखिकीं लिखितां च अभिव्यक्तिं कर्तुं शक्ष्यन्ति;
- संस्कृतसाहित्यं प्रति छात्रेषु अभिरुचेः वर्धनम्;
- संस्कृतसाहित्यस्य प्रमुखविधानां (गद्यपद्यनाटकादीनां) प्रतिनिधिरचनानां ज्ञानम्;
- छात्रोषु राष्ट्रियसांस्कृतिकसामाजिकनैतिक-मूल्यानां विकासः; एवं च
- विज्ञानप्रौद्योगिकीक्षेत्रो प्राचीनभारतीयमनीषिणां मौलिकान्वेषणचिन्तनविशिष्टयोगदानैः छात्राणां परिचयः।

### विशिष्ट- उद्देश्यानि

#### श्रवणकौशलम्

क. छात्राः संस्कृतस्य विशिष्टध्वनीन् श्रुत्वा अवगमिष्यन्ति। उदा.-पदान्तस्वरः पदान्तव्यंजनम्, विसर्गः, अनुस्वारः संयुक्ताक्षरम् इत्यादीनि;एवं च

ख. संस्कृतस्य सरलवाक्यानि तेषामर्थं श्रुत्वा ज्ञास्यान्ति तदनुसारेण च व्यवहारं करिष्यन्ति।

**वाचनकौशलम्**

क. संस्कृते प्रयुक्तानां विशिष्टध्वनीनां सम्यक्-उच्चारणं करिष्यन्ति (उदा-स्वरः, मात्रा, व्यंजनम्, संयुक्ताक्षाराणि इत्यादि);

ख. संस्कृतवाक्यानां सम्यक् उच्चारणं करिष्यन्ति;

ग. पद्यरचनानां सस्वरवाचनं करिष्यन्ति; एवं च

घ. पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दास्यन्ति।

**पठनकौशलम्**

क. संस्कृतगद्यांशानां, पद्यांशानां, नाट्यांशानां सारम् अवगमिष्यन्ति।

**लेखनकौशलम्**

क. पठितपदानि वाक्यानि च श्रुत्वा शुद्धवर्तन्यां लेखितुं शक्ष्यन्ति;

ख. सन्धियुक्तपदानां समासयुक्तपदानां च वाक्यानाम् अनुलेखनं करिष्यन्ति;

ग. पठितकथायाः तस्यांशानां वा सारं संस्कृतवाक्येषु लेखितुं शक्ष्यन्ति;

घ. चित्राणि दृष्ट्वा संस्कृतभाषायां तेषां वर्णनं कर्तुं शक्ष्यन्ति;एवं च

ङ. प्रदत्तानि वाक्यानि घटनाक्रमानुसारेण लेखितुं शक्ष्यन्ति।

## अध्धयनस्य प्रयोजनम्

संस्कृतभाषां पठित्वा छात्राः विश्वविद्यालयस्तरे प्रवर्तमानेषु पाठ्यक्रमेषु अध्ययनार्थम् अवसरं प्राप्तुं समर्थाः भविष्यन्ति, भारतीयस्य आध्यात्मिकसाहित्यस्य पारायणे, वैज्ञानिकचिन्तने शक्ताः भविष्यन्ति।

**पूर्वापेक्षाः**

अस्मिन् पाठ्यक्रमे प्रवेशात् पूर्वं छात्रः सरलसंस्कृतवाक्यानां श्रवणे भाषणे च कृताभ्यासः अस्ति। विविधसन्दर्भेषु संस्कृतश्लोकाः (सुभाषितानि) च तेन श्रुताः पठिताः च, तेषाम् अर्थावबोधने अपि स सक्षमः इति आशास्यते।

**आयुः** 14 वर्षम्

**निर्देशभाषा** : संस्कृतम्

**विषयावधि** : 240 होरा

**भारांशम्**

**सैद्धान्तिकः** 100 अंकाः

**शिक्षकांकित-मूल्यांकनप्रपत्रम्** : सैद्धान्तिकस्य 20%

**अध्ययनयोजना**

संस्कृतपाठ्यक्रमेण सह निम्नलिखितसामग्र्याः समायोजनं भविष्यति-

1. मुद्रिते द्वे पुस्तके।
2. श्रवणभाषणपठनलेखनकौशलानां विकासाय एकं शिक्षकांकित-मूल्यांकनप्रपत्रम् प्रदास्यन्ते।
3. व्याकरणस्य शिक्षणं प्रायोगिकरूपेण पाठैः सह एव भविष्यति।
4. त्रिंशत्(30) सम्पर्ककक्षाः अध्ययनकेन्द्रेषु भविष्यन्ति।
5. श्रवणभाषणकौशलयोः विकासःअध्ययनकेन्द्रेषु संपर्ककक्षासु भविष्यति।
6. पाठनिर्माणे संपर्ककक्षासु च अध्यापनकाले छात्रेषु जीवनकौशलानां सम्यक् विकासः भवेत् इति ध्यातव्यम् भविष्यति। अनेन तेषु स्वतः चिंतनतर्कशक्तेश्च विकासः भविष्यति।
7. पाठ्यक्रममिमं विद्यार्थी एकवर्षतः अधिकाधिकं पञ्चवर्षेषु पूरयितुं शक्नोति।

**मूल्यांकनयोजना**

1. उपर्युक्तांकविभाजनानुसारेण शतम् (100) अंकानां एका लिखितपरीक्षा भविष्यति। एतदतिरिक्तम् सम्पर्ककक्षासु विंशति(20) अंकानां शिक्षकांकितमूल्यांकनपत्रम् अपेक्षितम् ।अध्ययनकेन्द्रेषु शिक्षकांकितमूल्यांकनपत्रस्य (परीक्षायाः) मूल्यांकनं भविष्यति।

| **मूल्यांकनयोजना** | **कालावधि** | **भारांश (अंकाः)** |
|---|---|---|
| शिक्षकांकितमूल्यांकनपत्रम् | -- | 20% |
| वर्षान्तलिखितपरीक्षा | 03 होरा | 80% |

2. प्रश्नपत्रो ज्ञानावबोध्नाभिव्यक्ति- इतिभेदत्रायाणां प्रश्नानां सम्यक् अनुपातस्य समायोजनं भविष्यति अनेन सह अतिलघूत्तरात्मक- लघूत्तरात्मक-निबन्धात्मक-प्रश्नानामपि समावेशः भविष्यति।

3. भाषाकौशलानां विकासार्थं विशेषतः श्रवणे भाषणे च अध्यापकैः सम्पर्ककक्षासु यथावसरं मौखिकमूल्यांकनं भविष्यति।

**उत्तीर्णता मापदण्ड**: सैद्धांतिकस्य 33%

**पाठ्यसामग्री :**

**मुख्यबिन्दवः**

| **क्र. सं.** | **मुख्यबिन्दवः** | **कालावधि** | **औचित्यम् / विवरणम् (सैद्धान्तिकम्)** | **औचित्यम् / विवरणम् (प्रयोगिकम्)** | **भारांश (अंकाः)** |
|---|---|---|---|---|---|
| 1. | **क. पाठ्यपुस्तकम्**<br>1. (i) गद्यांशाधरितः(05 अंकाः)<br>(ii) पद्यांशाधरितः (05 अंकाः)<br>(iii) नाट्यांशाधरितः (05 अंकाः)<br>2. भावार्थः<br>(i) गद्य (05 अंकाः)<br>(ii) पद्य (05 अंकाः)<br>3. प्रश्ननिर्माणम् (05 अंकाः)<br>4. पाठाधरितप्रश्नाः (05 अंकाः)<br>5. पाठ-सारांशः (कथामूलतः) (05 अंकाः)<br>6. पाठाधारितलेखक/ ग्रन्थपरिचयः (05 अंकाः)<br>7. चरित्रचित्राणम् (05 अंकाः) | **120 होरा** | **1. श्रवणकौशलम्**<br>क. छात्राःसंस्कृतस्य विशिष्टध्वनीन् श्रुत्वा अवगमिष्यन्ति। उदा.-पदान्तस्वरः पदान्तव्यंजनम्, विसर्गः, अनुस्वारः संयुक्ताक्षरम् इत्यादीनि।<br>ख. संस्कृतस्य सरलवाक्यानि तेषामर्थं श्रुत्वा ज्ञास्यान्ति तदनुसारेण च व्यवहारं करिष्यन्ति।<br>**2. वाचनकौशलम्**<br>क. संस्कृते प्रयुक्तानां विशिष्टध्वनीनां सम्यक्-उच्चारणं करिष्यन्ति (उदा- | | **50** |

| | | | | | |
|---|---|---|---|---|---|
| | | | स्वरः, मात्रा, व्यंजनम्, संयुक्ताक्षाराणि इत्यादि)<br>ख. संस्कृतवाक्यानां सम्यक् उच्चारणं करिष्यन्ति।<br>ग. पद्यरचनानां सस्वरवाचनं करिष्यन्ति।<br>घ. पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दास्यन्ति।<br>**3. पठनकौशलम्**<br>क. संस्कृतगद्यांशानां, पद्यांशानां, नाट्यांशानां सारम् अवगमिष्यन्ति।<br>**4. लेखनकौशलम्** | | |
| 2. | **ख. प्रायोगिक-व्याकरणम्**<br>1. वर्णपरिचयः उच्चारणस्थानं च (02 अंकाः)<br>2. संधिः (05 अंकाः)<br>(i) स्वरसंधिः<br>(ii) व्यंजनसंधिः (02अंकाः)<br>(iii) विसर्गसंधिः (01अंकाः)<br>3. शब्दरूपाणि<br>(i) शब्दरूपम्<br>(ii) संख्यावाचिशब्दाः | **72 होरा** | प्रायोगिक-व्याकरणस्य पाठनस्य अधोलिखितानि विशिष्टउद्देश्यानि सन्ति<br>1. वर्णपरिचयः उच्चारणस्थानानि च।<br>2. सन्धिपरिचयः<br>क. स्वरसंधिः - दीर्घः, गुणः, वृद्धिः, यण्, | | **30** |

| | | | | | | |
|---|---|---|---|---|---|---|
| | (01अंकाः)<br>4. धतुरूपाणि (04 अंकाः)<br>5. समासाः (04 अंकाः)<br>6. प्रत्ययाः (05 अंकाः)<br>1. कृत्, क्त्वा, ल्यप्, तुमुन् क्त, क्तवतु, शतृ शानच् (02 अंकाः)<br>2. तद्धित, त्व, तल्, ठक, तरप्, तमप् (02 अंकाः)<br>3. स्त्री, टाप्, ङीप् (01 अंकाः)<br>7. कारक (03 अंकाः)<br>(i) कारकविभक्तयः (01 अंकाः)<br>(ii) उपपदविभक्तयः (02 अंकाः)<br>8. उपसर्गाः (01 अंकाः)<br>9. अव्ययपदानि (01 अंकाः) | | अयादि।<br>ख. व्यंजनसंधिः - श्चुत्व, ष्टुत्व, जश्त्व, चर्त्व, अनुस्वारः।<br>ग. विसर्गसंधिः - सत्व, रुत्व, उत्व, रेपफलोपः<br>**शब्दरूपाणि**<br>स्वरान्त- बालक, पफल, लता, मुनि, पति, मति, नदी, साधु, मधु, मातृ, पितृ धेनु।<br>व्यंजनान्त- राजन्, विद्वस्, गच्छत्, आत्मन्, पयस्, नामन्, जन्मन् ।<br>सर्वनामपदानि- सर्व, यत्, तत्, किम्, इदम्, भवत्, अस्मद्, युष्मद् (सर्वेषु लिंगेषु)<br>संख्यावाचीशब्दाः- 1-5 (एकतः, पञ्चपर्यन्तम्) संख्यानां रूपाणि।<br>संख्याज्ञानम्- 1-100 (एकतः, शतपर्यन्तम्) संख्यानां संस्कृते लेखनम् ।<br>**धतुरूपाणि**<br>भ्वादि - भू, पठ्, पा (पिब्), गम् (गच्छ्) दृश्, (पश्य्), लिख्, | | |

| | | | | | |
|---|---|---|---|---|---|
| | | | लभ्, नी।<br>अदादि- अस्, ब्रू, हन्,<br>जुहोत्यादि- दा, ध।<br>दिवादि- नृत् नश्, विद्, मन् ।<br>स्वादि - शक्, श्रु, आप् ।<br>तुदादि- प्रच्छ्, इष् (इच्छ)<br>तनादि- कृ, तन्<br>क्रयादि- क्री, ग्रह्<br>चुरादि- चुर, भक्ष्, कथ्<br>**उपसर्गाः** - पाठानुसारेण।<br>**प्रत्ययाः**<br>कृत्प्रत्ययाः - क्त्वा, ल्यप्, तुमुन् शतृ, शानच्, तव्यत्, अनीयर्, क्त, क्तवतु।<br>तद्धितप्रत्ययाः - मतुप्, तरप्, तमप्, ठक्, त्व, तल्, इन् ।<br>स्त्रीप्रत्ययाः -टाप्, ङीप्<br>**कारकविभक्तयः**<br>कारक-उपपदविभक्तयश्च<br>सामान्यपरिचयः<br>**समासाः**<br>अव्ययीभावः, तत्पुरुषः, कर्मधरयः, द्विगुः,द्वन्द्वः,बहुव्रीहिश्च। समस्तपदानां | | |

| | | | | | |
|---|---|---|---|---|---|
| | | | विग्रहः समस्तपदनिर्माणं च। | | |
| 3. | **ग. रचना**<br>1. अनुच्छेदलेखनम् (05 अंकाः) (संकेताधरितः) मंजूषायुक्तः<br>2. पत्रालेखनम्<br>3. चित्रावर्णनम्<br>4. अपठितगद्यांशाधरित प्रश्नोत्तराणि (05 अंकाः) (40-50 शब्दपरिमितः) | **48 होरा** | क. पठितपदानि वाक्यानि च श्रुत्वा शुद्धवर्तन्यां लेखितुं शक्ष्यन्ति।<br>ख. सन्धियुक्तपदानां समासयुक्तपदानां च वाक्यानाम् अनुलेखनं करिष्यन्ति।<br>ग. पठितकथायाः तस्यांशानां वा सारं संस्कृतवाक्येषु लेखितुं शक्ष्यन्ति।<br>घ. चित्राणि दृष्ट्वा संस्कृतभाषायां तेषां वर्णनं कर्तुं शक्ष्यन्ति।<br>ङ. प्रदत्तानि वाक्यानि घटनाक्रमानुसारेण लेखितुं शक्ष्यन्ति। | | **20** |